# Rishistutih

# ऋषिस्तुतिः

## Document Information

Text title : Hymn to Ancient Rishis / Munis / Sages 2

File name : RRiShistutiH2.itx

Category : deities_misc

Location : doc_deities_misc

Proofread by : G.K.M Kartha

Description/comments : Goraksha Nikilavani page 12 2065_05

Latest update : October 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# ऋषिस्तुतिः

विश्वामित्र वसिष्ठ वत्स भरत व्यासङ्गिरो गौतमाः
माण्डव्यात्रि पुलस्त्य धौम्य पुलहाऽष्टावक्र गर्गादयः ।
मार्कण्डेय विभाण्डको शुक शतानन्दाश्वलोद्दालका
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ १॥

यास्को गालव याज्ञवल्क्य जनको जाबाल्यगस्त्यादयो
भारद्वाज उतथ्य लोमशकृपाः सूतादयः शौनकः ।
दुर्वासा भृगु भार्गवौ च कुशिकः शाण्डिल्य गार्ग्यायणी
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ २॥

नन्दी नारद् तुम्बुरुश्च कपिलो सौबाष्कलौ देवलः
सिद्धास्ते सनकादयोरहगणः कौडिन्य शिब्यादय ।
शृङ्गी गौतम शुष्य शृङ्ग मनवो मान्धात मेधा ध्रुवाः
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ ३॥

शको दीर्घतमा दधीचिरुपमन्यः पिप्पलादादयो
बार्हस्पत्य कणाद् पाणिनि बृहस्पत्यासुरोन्द्रादयः ।
शङ्खः पञ्चशिखः पराशर वृषा मेधातिथिर्मुद्गलो
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ ४॥

मौद्गल्योऽथ धनञ्जयो सित भरद्वाजा नलो धर्मराड्-
माण्डव्यासाङ्गिरसौ ययाति भरताः कण्वोऽथ हारीतकः ।
शक्तिः कश्यप काश्यपौच्यवनको वात्सायनश्च क्रतु
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ ५॥

वैशम्पायन पिप्पलायन बुधास्तौ जह्नु कात्यायनौ
गोरक्षो जमदग्नि जैमिनी शुनश्शेपाश्च सामश्रवाः ।
गार्ग्यः शाकल शाकटायन शकाः शाकस्य कौत्सादयो
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ ६॥

भीष्मो भागुरि पिङ्गलौ च सगरो द्रोणः सहस्रार्जुनो
बुद्धो वामन कासकृत्स्न शबराः पाण्ड्वम्बरीषादयः ।
आपस्तम्ब पतञ्जली पुरुरवाः पुष्य पृथुः पाण्डवाः
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ ७॥

देवापिर्वरतन्तु शन्ततु गदा दाल्भ्योऽभिमन्युर्वसू
रैभ्यः सौभरि जैबली बलि मिथी बौद्धायनो नैमिषः ।
अश्वत्थाम विलेशयौ द्रुपदको नेमिः मृकन्डुर्यमो
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ ८॥

आत्रेयो जनमेजय श्रवणकः स श्वेतकेतुर्लवः
काकुत्स्थश्च विकुक्षि सञ्जय महावीराः सुधन्वोदयः ।
श्वेताश्वो नचिकेत लक्ष्मण पुरु श्रीक्षेमधन्वादयो
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ ९॥

लौकाक्षी च वसन्तनो दयनको स व्याघ्रपादो जयः
शाल्वः शूर कुशध्वजाऽज विदुरास्तेवासुदेवादयः ।
ऋक्सेना ऋतुपर्ण कर्णक दिवोदासैकलव्यादयो
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ १०॥

प्रह्लादो डहरः सुभिक्ष ललितौ शुरः शिलादित्यको
बप्यो विक्रम भोज भतहरयस्ते गोपिचन्द्रादयः ।
मानांशूदय नाग नीप मलयाः पृथ्वी प्रतापौ शिवौ
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ ११॥

पैङ्गी भृङ्गि मरीचि कर्दममुखाः कल्माषपादो यदु-
र्दुष्यन्तः सुरथ समाधि नहुषौ हर्षः प्रियादिव्रतः ।
अन्ये चापि तुलाधर प्रभृतयो लर्कश्च पारस्करो
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ १२॥

अग्नीध्रो हरिरग्निबाहु सवनौ नाभिर्वसुः केतुमान्
ज्योतिष्मान् द्युतिमानिलावृत हिरण्मद्रम्यकाहव्यकः ।
पत्रः किम्पुरुषः कृशाश्व, ऋषभौ भद्राश्व मुख्याखिला
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ १३॥

पुण्यास्ते मनवश्चतुर्दश शुभास्ते वालखिल्यादय

इक्ष्वाकुः कुरु रन्तिदेव रघवो रामो दिलीपोंऽशुमान् ।
पाला पङ्क्तिरथो भगीरथ कुसौ नागाश्च सेनादयो
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ १४॥

सिंहालिच्छवि मल्लशाह सहिताश्चन्द्राश्च चोलादयो
गुप्तावर्धन वर्मदेव सहजाः शाक्या शका विक्रमाः ।
चाणक्यश्चरकश्च सुश्रुत भटौ नागो नृगो माधवो
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ १५॥

अन्ये स्व स्व कृतिप्रसिद्धयशसो ब्रह्मर्षि राजर्षयः
शत्रुघ्नो भरतोऽथ लक्ष्मणबली कृष्णोद्धवौ सात्यकी ।
प्रद्युम्नोऽप्यसमञ्जसो वृष हरिश्चन्द्रौ नरेन्द्रादयोः
विश्वे वैदिकधर्मरक्षक ऋषिव्राताः सदा पान्तुनः ॥ १६॥

इति ऋषयः स्तुतिः समाप्ता ।

Proofread by D.K.M. Kartha

*Rishistutih*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*